# Yamunashtakam 2

# યમુનાષ્ટકમ્ ૨

## Document Information

Text title : yamunaashhTakam 2

File name : yamunaa82.itx

Category : aShTaka, devii, nadI, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : August 23, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Yamunashtakam 2

# યમુનાષ્ટકમ્ ૨

॥ શ્રીઃ ॥

કૃપાપારાવારાં તપનતનયાં તાપશમનીં
મુરારિપ્રેયસ્યાં ભવભયદવાં ભક્તિવરદામ્ ।
વિયજ્જ્વાલોન્મુક્તાં શ્રિયમપિ સુખાપ્તેઃ પરિદિનં
સદા ધીરો નૂનં ભજતિ યમુનાં નિત્યફલદામ્ ॥ ૧॥

મધુવનચારિણિ ભાસ્કરવાહિનિ જાહ્નવિસઙ્ગિનિ સિન્ધુસુતે
મધુરિપુભૂષણિ માધવતોષિણિ ગોકુલભીતિવિનાશકૃતે ।
જગદઘમોચિનિ માનસદાયિનિ કેશવકેલિનિદાનગતે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૨॥

અયિ મધુરે મધુમોદવિલાસિનિ શૈલવિદારિણિ વેગપરે
પરિજનપાલિનિ દુષ્ટનિષૂદિનિ વાઞ્છિતકામવિલાસધરે ।
વ્રજપુરવાસિજનાર્જિતપાતકહારિણિ વિશ્વજનોદ્ધરિકે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૩॥

અતિવિપદમ્બુધિમગ્નજનં ભવતાપશતાકુલમાનસકં
ગતિમતિહીનમશેષભયાકુલમાગતપાદસરોજયુગમ્ ।
ઋણભયભીતિમનિષ્કૃતિપાતકકોટિશતાયુતપુઞ્જતરં
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૪॥

નવજલદદ્યુતિકોટિલસત્તનુહેમભયાભરરઞ્જિતકે
તડિદવહેલિપદાઞ્ચલચઞ્ચલશોભિતપીતસુચેલધરે ।
મણિમયભૂષણચિત્રપટાસનરઞ્જિતગઞ્જિતભાનુકરે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૫॥

શુભપુલિને મધુમત્તયદૂદ્ભવરાસમહોત્સવકેલિભરે
ઉચ્ચકુલાચલરાજિતમૌક્તિકહારમયાભરરોદસિકે ।

નવમણિકોટિકભાસ્કરકઞ્ચુકિશોભિતતારકહારયુતે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૬॥

કરિવરમૌક્તિકનાસિકભૂષણવાતચમત્કૃતચઞ્ચલકે
મુખકમલામલસૌરભચઞ્ચલમત્તમધુવ્રતલોચનિકે ।
મણિગણકુણ્ડલલોલપરિસ્ફુરદાકુલગણ્ડયુગામલકે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૭॥

કલરવનૂપુરહેમમયાચિતપાદસરોરુહસારુણિકે
ધિમિધિમિધિમિધિમિધિમિતાલવિનોદિતમાનસમઞ્જુલપાદગતે ।
તવ પદપઙ્કજમાશ્રિતમાનવચિત્તસદાખિલતાપહરે
જય યમુને જય ભીતિનિવારિણિ સંકટનાશિનિ પાવય મામ્ ॥ ૮॥

ભવોત્તાપામ્ભોધૌ નિપતિતજનો દુર્ગતિયુતો
યદિ સ્તૌતિ પ્રાતઃ પ્રતિદિનમનન્યાશ્રયતયા ।
હયાહ્રેષૈઃ કામં કરકુસુમપુઞ્જૈ રવિસુતાં
સદા ભોક્તા ભોગાન્મરણસમયે યાતિ હરિતામ્ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
યમુનાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Sridhar Seshagiri

*Yamunashtakam 2*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*